और वह वृत्तान्त अपनी स्वामिनी के पास जाकर कहा। एक संवत्सर बीतगया तब श्रीलक्ष्मी की पूजा के दिन चिल्ल देवी के मन्दिर में यह व्रत आरम्भ हुआ। जब राजा ने बाजे आदि के शब्द सुने तो उसने बटु से जो अब मन्त्री के पद पर नियुक्त था पूछा कि यह क्या वहां हो रहा है तो वटु से वार्ता सुन कर उस से पूछा कि अरे! वह मेरा डोरा कहां है। उस से डोरे के तोडने का हाल सुन कर राजा चोल देवी के ऊपर बडा क्रुद्ध हुआ और लक्ष्मी जी के पूजन के लिये चिल्लदेवी के गृह में गया। इतने में लक्ष्मी जी (भोब गरजमाज–देवी गरुड जी की माता) वृद्ध स्त्री का रूप धारण कर परीक्षा के लिये चोल देवी के गृह में आई–वहां चोल देवी उससे कहने लगी, हे दुष्टे! तू यहां से चली जा मेरे गृह में आने से क्या है? ऐसे अवमानित हो कर लक्ष्मी जी ने उसे शाप दिया कि तू ने मेरा अनादर किया है इस लिये तू शूकरमुखी हो जा तदंतर महा लक्ष्मी जी वृद्ध स्त्री रूप में चिल्ल देवी के गृह में आई। जहां पूजा हो रही थी बहुत प्रकार से संमान और पूजन स्वीकर करके उसने वृद्ध स्त्री रूप को छोड दिया और प्रत्यक्ष हुई तब चिल्लदेवी ने उस आज को पंचोपचार से पूजा की। श्री देवी पूजन से प्रसन्न हुई और रानी को वर मांगने को कहा। रानी बोली:-

हे सुरेश्वरी तुम्हारा यह व्रत जो करेंगे उनका गृह आप से कदापि न त्यागा जावे और आज से यह भूपकी कथा संसार में विख्यात् हो और हे देवी जी! मेरी भक्ति सदा आप में बनी रहे और सद्भाव से जो इस कथा को सुनेंगे उनको वांछित फल आपको सदैव देना चाहिये। "तथास्तु"

कह कर महालक्ष्मी जी वहां ही अन्तर्हित हो गई । उस समय दुराचारिणी चोल देवी चिल्लदेवी के गृह की ओर ईर्षासे आई परन्तु द्वारपालों से वारित होने से वह भागी और जंगल में अंगिरा ऋषि के आश्रम पर पहुंची। चोल देवी की अद्भुत आकृति देख के ज्ञान दृष्टि से विचार कर के उस मुनिनें रानी से महा लक्ष्मी जी का व्रत कराया। व्रत करने से रानी महा यशस्विनी तथा लावण्य का स्थान हो गई । फिर किसी समय राजा शिकार के लिये वन में आया तब उस ने उस मुनि के आश्रम में उस सुन्दर स्त्री को देखा । मुनि से पूछा कि यह धन्या स्त्री कौन है । मनि ने उसका सब हाल राजा को सुनाया और उस को राजा के हवाले किया। राजा चोलदेवी के साथ अपने राज्य में आ गया। चिल्ल देवी भी "चीलदेवी समागमम्" याने चोलदेवी जहां कहीं गयी है । वहां से लौट आये, ऐसा वर श्री देवी से मांगती रही थी। अब दोनों का समागम हुआ तब जैसे गंगा यमुना समुना समुद्र से सदा मिली रहती हैं वैसे हो मंगल राजा से वह स्त्रियां मिल गई । वह मंगल राजा दोनों स्त्रियों के साथ प्यारी पृथिवी को भोगता हुआ अन्त में आकाश में जाके विष्णु दैवत (श्रवण) नक्षत्र हुआ। नारद जी बोले हे इन्द्र ! यह व्रत सब व्रतों में उत्तम है सब तीर्थों में जैसे प्रयाग, देवों में जैसे भगवान, नदियों में जैसे गंगा । इस व्रत के करने से अवश्य वांछित फल की प्राप्ति होती है तुम इस व्रत को करो ॥ श्री कृष्ण जी युधिष्ठिर से बोले हे-युधिष्ठिर तुम भी इस व्रत को करो । इन्द्र ने इस व्रत को किया और वृतासुर के भय

से मुक्त हुआ तुम भी इस व्रत के करने से वांछित फल प्राप्त करोगे ।।

ओम् शान्ति: शान्ति: शान्ति: ।

श्री भविष्योत्तर पुराण में दी हुई कथा का संक्षिप्त अनुवाद समाप्त हुआ ।

नमस्ते गरुडारूढे कोलासुर भयंकरि । सर्व पाप हरे देवि महा लक्ष्मि नमोस्तु ते ।।

देवी करे – जैसे इन दोनों रानियों के दिन समय पर फिरे वैसे ही सब दु:खियों के दिन देवी फिरें ।।

★ ★ ★

(१६) अथ सम्पूर्ण इन्द्राक्षी

ॐ अस्य श्री इन्द्राक्षी स्तोत्र महा मंत्रस्य शची पुरन्दर ऋषि अनुष्टुप छन्द: श्री इन्द्राक्षी दूर्गा देवता लक्ष्मीर्बीजम् भुवनेश्वरी शक्ति: भवानीति कीलकम मम श्री इन्द्राक्षी प्रसाद सिद्धर्थे पाठे विनियोग: ।। अथ कर न्यास: – ॐ इन्द्रक्षींति अङ्गुष्ठाभ्यां नम: ।। महा लक्ष्मींति तर्जनीभ्यां नम: । महेश्वरीति मध्यमाभ्यां नम: । अम्बुजाक्षींति अनामिकाभ्यां नम: । कात्यायनींति कनिष्ठकाभ्यां नम: । कौमारीति करतल कर पृष्ठाभ्यां नम: ।। अथहृदयादि न्यास: – इन्द्रक्षींति हृदयाय नम: । महालक्ष्मींति शिरसे स्वाहा । महेश्वरीति शिखायै वौषठ । अम्बुजाक्षींति कवचाय हुँ । कात्यायनीति नेत्राभ्यां वौषठ । कौमारीत्यस्त्राय फट ।। प्राणायाम: ।।

॥ अथ ध्यानम् ॥

नेत्राभ्यां दशभिश्शतैः परि वृत्तामत्युग्र चर्मांबरां । हेमाभां महतीं विलम्बित शिखामामुक्त केशान्वितां । घण्टा मण्डित पाद पद्मयुगलां नागेंन्द्र कुम्भस्तिनीमिन्द्राक्षीं परिचिन्तयामि मनसा सर्वार्थं सिद्धि प्रदाम् ॥१॥

श्री इन्द्राक्षी नौमि युवती नाना लंकार भूषिताम् ।
प्रसन्न वदनां भोज्ञमप्सरो गरण सेविताम् ॥२॥

पीताम्बरां वज्रधरैक हस्तां नानाविधालंकररणां प्रसन्नां त्वामप्सरस्सेवित पाद पद्मामिन्द्राक्षीं वन्दे शिव धर्मंपत्नीम् ॥३॥

इन्द्रक्षीं द्विभुजां देवीं पीत वस्त्र द्वयान्विताम् ।
वामे हस्ते वज्रधरां दक्षरोन वरप्रदाम् ॥ ४ ॥

इन्द्रर्दिभिः सुरवैर्रवंन्ध्यां वन्दे शंकर वल्लभाम् ।
एवं ध्यात्वा महा देवीं जपेत्सर्वार्थ सिद्धये ॥५॥

सहस्त्रनेत्रां सूर्याभां नाना लङ्कार भूषिताम ।
प्रसत्र वदनां नित्यामप्सरोगण.सेविताम् ॥ ६ ॥

श्री दुर्गा सौभ्य वदनां पाशाङकुश धरांपराम् ।
त्रैलोक्य मोहिनीं देवींभवानीं प्रणमाम्यहम् ॥७॥

ॐ लंपृथिव्यात्मने गन्धं समर्पयामि नमः । हं आकाशात्मने पुष्पं समर्पयामि नमः यं वाय्वा त्मने धूपं समर्पयाभि नमः रं अज्ञानात्मने रत्तदीपं समर्पयामिनमः । वं अमृतात्मने अमृतं महा नैवेध्यं निवेदयामि नमः । सं सर्वात्मने सर्वोपचार पूजां समर्पयानि नमः ॥

★ ★ ★

श्री इन्द्र उवाच

ॐ वज्रिणी पूर्वतः पातु चाग्नेयां परमेश्वरी । दण्डिनी दक्षिणे पातु नैऋत्यांपातु खड्गिनी । पश्चिमे पाशधारी च ध्वजस्था वायु दिङ्गमुखे । कौमोदकी तथोदीच्यां पात्वैशान्यां महेश्वरी । ऊर्ध्व देशे पद्मनीमामधस्तात्पातु वैष्णवी । एवं दश दिशो रक्षेत्सर्वदा भुवनेश्वरो ॥ शची पतये विद्महे, पाक-शासनाय धीमहि तन्नः इन्द्राक्षी प्रचोदयात् ।३। ॥१॥

उन्द्राक्षी नाम सा देवी देवतै समुदाहृता । गौरी शाकंभरी देवी दुर्गानाम्नीति विश्रुता ॥ २ ॥ नित्यानन्दा निराहारा निष्कलायै नमोऽस्तुते । कात्यायनी महा देवी छिन्न घण्टा महा तपाः ॥२॥ सावित्री साच गायत्री ब्रह्माणी ब्रह्मवादिनी । नारायणी भद्रकाली रुद्राणी कृष्ण पिंगला ॥३॥ अग्निज्वाला रौद्र मुखी काल रात्रिस्तपस्विनी । मेघ स्वाना सहस्त्राक्षी विकरांगी जडोदरी ॥ ४ ॥ महोदरी मुक्तकेशी घोर रूपा महा बला । अजिता भद्रदानन्ता रोग हर्त्री शिव प्रिया ॥ ५ ॥ शिव दूती करालीच प्रत्यक्ष परमेश्वरी । इन्द्राणी इन्द्र रूपा च इन्द्र शक्तिः परायणा ॥६॥ सदा संमोहिनी देवी सुन्दरी भुवनेश्वरी । एकाक्षरी परब्रह्मी स्थूल सूक्ष्म प्रेवर्धिनी ॥७॥ एकाक्षरी रक्तदन्ता रक्तमाल्यां बरा परा । महिषासुर हन्त्री च चामुण्डा खड्गधारिणी ॥८॥ वाराही नारसिंही च भीमा भैरव नादिनी । श्रुति स्मृतिर्धितिर्मेधाविध्या लक्ष्मीः सरस्वती ॥९॥ अनन्ता विजयाऽपर्णा मानस्तोकाऽपराजिता । भवानी पार्वती दुर्गा हैमवत्यम्बिकाशिवा ॥१०॥ शिवा भवानी रुद्राणी शंकरार्ध शरीरिणी । ऐरावत गजारूढ़ा वज्रहस्ता वर प्रदा ॥ ११ ॥ भ्रामरी काञ्चि कामाक्षी क्वणन्मानिक्य नूपुरा । त्रिपर्द भस्म

ग्रहर्ना त्रिशिश रक्त लोचना ॥१२॥ नित्या सकल कल्याणी सर्वैश्वर्य प्रदायिनी । दाक्षायिनी पद्महस्ता भारती सर्वमङ्गला ॥१३॥ कल्याणी जननी दुर्गा सर्व दुर्ग विनाशिनी । इन्द्राक्षी सर्व भूतेशी सर्व रूपा मनोन्मनी ॥१४॥ महिषासुर हर्त्री च चामुण्डा सप्तमातृका । ऐन्द्री देवी सदा कालं शान्तिमाशु करोतुम मे ॥१५॥ महिष मस्तक नृत्य विनोदन स्फुटरण प्रणि नूपुर पादुका । जनन रक्षणमोक्ष विधायिनी जयतु शुम्भ निशुम्भ निषूदिनी ॥१॥ सर्व मंगल मांगले शिवे सर्वार्थ साधिके । शरण्येत्र्यम्बके देवि नारायणि नमोऽस्तुते ॥२॥ शिवा चं शिव रूपाच शिव भक्ति परायणा । मृत्यंजया महा माया सर्व रोग निवारिणी ॥३॥

या माया मधुकैटभ प्रमथिनी या माहि षोन्मूलिनी । याधूम्रेक्षणचण्ड मुण्ड मथिनी यारक्तबीजाशनी ॥ शक्तिः शुम्भ निशुम्भ दैत्य दलिनी या सिद्ध लक्ष्मी परा । सा देवी नव कोटि–मूर्ति सहिता मां पातु माहेश्वरी ॥ जप्तं पाप हरं बलं नुत करं संपूजितं श्रीकरं ध्यातं मानकरं स्तुतं धन करं सम्भाषितं सिद्धदम् । गीतं सुन्दरि वाञ्छितं प्रतनुते ते पाद पद्मद्वयं । भक्तानां भवभीतिभञ्जन करं सिद्धचक्रदं पातुनः ॥ मायाकुण्डलिनी क्रियामधुमती काली कला मालिनी, मातङ्गी विजया जया भगवती देवी शिवा शाम्भवी । शक्ति. शङ्कर वल्लभात्रिनयना वाग्वादिनी भैरवीह्रींकारी त्रिपुरा परा परमयी माता कुमारी त्यसि ॥

★ ★ ★

(२०) अथ शिवनिर्वाणस्तुतिः ॥ क्षमापनस्तुतिश्च ॥

जयत्यऽनन्यसामान्यप्रकृष्टगुणवैभवः । संसारनाटकारम्भनिर्वा–हनकविः शिवः । ॐनमः शिवाय भूतभव्यभाविभावभाविने । ॐनमःशिवाय मातृमानमेयकलनाजुषे । ॐनमः० भीमकान्त–शान्तशक्तिशालिने । ॐ० शाश्वताय शङ्कराय शम्भवे । ॐ० निर्निकेतनिःस्वभावमूर्त्तये । ॐ०निर्विकल्पनिष्प्रपञ्चसंविदे । ॐ० निर्विवादनिष्प्रमाणसिद्धये । ॐ० निर्मलाय निष्कलाय वेधसे । ॐ० पार्थिवाय गन्धमात्रसंविदे । ॐ० षड्साद्यसाम्यरस्यतृप्तये ॥१०॥ ॐ० तैजसाय रूपितानिरूपिणे । ॐ० पावनाय सर्व–भावसंस्पृशे । ॐ० नाभसाय शब्दमात्रराविणे । ॐ०निर्गलन्म–लव्यपायि पायवे । ॐ० विश्वसृष्टिसौष्ठवैकमेधसे । ॐ० सर्वतः प्रसारिपादसम्पदे । ॐ० विश्वभोग्यभोगयोग्यपाणये । ॐ०वाचक–प्रपञ्चवाच्यवाचिने । ॐ० नस्यगन्धसर्वगन्धबन्धवे । ॐ०पुद्गला-लिलोलकाग्रशालिने ॥२०॥ ॐ०चाक्षुषाय विश्वरूपसन्दृशे ॐ० तद्गु-णत्रयविभागभूतये । ॐ० पौरुषाय भोक्तृदाय मानिने । ॐ० सर्वतो नियन्तृतानियामिने । ॐ०कामभेदकल्पनोपकल्पिने । ॐ०-किञ्चदेव वत्सताकरासृजे । ॐ०किञ्चिदेव वेत्तृतोपपादिने । ॐ०सर्वभोग्यवर्धनोपरागिणे । ॐ० शुद्धविद्यतत्त्वमन्त्ररूपिणे । ॐ०दृक्त्वयाविकस्वरेशात्मने ॥३०॥ ॐ० सर्वविस्प्रभो सदाशिवाय ते । ॐ०वाच्यवाचकादिषड्कभित्तये । ओं० वर्णमंत्रसत्पदो–पपादिने । ॐ०पञ्चधा कलाप्रपञ्चपञ्चिने । ॐ०सौरजैनबौद्ध–शुद्धभागिने । ॐ० भक्तिमात्रलभ्यदर्शनाय ते । ॐ०सर्वतो गरीयसां गरीयसे । ॐ०सर्वतो महीयसां महीयसे । ॐ०सर्वतः स्थवीयसां स्थवीयसे । ॐ० तुभ्यमस्त्वणीयसा–मणीयसे ॥४०॥ ॐ०मन्दराद्रिकन्दराधिशायिने । ओं०जाह्नवी-

जलोज्ज्वलाभजूटिने । ॐ०भालचन्द्रचन्द्रिकाकिरीटिने । ॐ० सो-मसूर्यवह्निमात्रनेत्र ते। ॐ० कालकूटकण्ठपीठसुश्रिये । ॐ० धर्मरूप-पुङ्गवध्वजाय ते । ॐ० भस्मधूलिशालिने त्रिशूलिने । ॐ० सर्वलोकपालिने कपालिने । ॐ० सर्वदैत्यमर्दिने कपर्दिने। ॐ० नित्यनम्रनाकिने पिनाकिने ॥५०॥ ॐ० नागराजहारिणे विहारिणे । ॐ० शैलजाविलासिने सुखासिने । ॐ० मन्मथप्रमाथिने पुरप्लुषे । ॐ० कालदेहदाहयुक्तिकारिणे । ॐ० नागकृत्तिवाससेऽप्यऽवाससे । ॐ० भीषणश्मशानभूमिवासिने । ॐ० पीठशक्तिपीठकोपपादिने । ॐ० सिद्धमन्त्रयोगिने वियोगिने । ॐ०-सर्वदृक्चतुर्नयादिकारिणे । ॐ० सर्वतीर्थतीर्थताविधायिने ॥६०॥ ॐ० साङ्गवेदतद्विचारचारवे । ॐ० षट्पदार्थषोडशार्थवादिने । ॐ० सांख्ययोगपाञ्चिरात्रपञ्चने । ॐ० धातृविष्णुशर्वकादिरूपिणे । ॐ० धातृविष्णुप्रमुखात्मरूपिणे । ॐ० भोग्यदाय भोग्यभोगरूपिणे । ॐ पारगाय पारणाय मन्त्रिणे । ॐ०-पारमार्थपार्थिवस्वरूपिणे। ॐ० सर्वमण्डलाधिपत्यशालिने । ॐ०-सर्वशक्तिवासनानिवासिने ॥७०॥ ॐ० सर्वतन्त्रवासनारसात्मने । ॐ०सर्वमन्त्रदेवतानियोगिने । ॐ०स्वस्थिताय नित्यकर्ममालिने । ॐ०कालकल्पकल्पिने सुतल्पिने । ॐ० भक्तकाय सौख्यदाय शम्भवे । ॐ भूर्भुवःस्वरात्मलक्ष्यलक्षिणे । ॐ० शून्यभावशान्तरूपधारिणे । ओं०सर्वभावशुद्धबुद्धिहेतवे । ओं०सर्वसिद्धिदायिने सुमायिने । ओं० भक्तिमात्रसंस्तुताय शूलिने ॥८०॥ ओंनमः शिवाय भास्वते । ओं०भर्ग ते । ओं० शर्व ते । ओं० गर्व ते । ओं० खर्व ते । ओं० पर्व ते । ओं० रुद्र ते। ओं० भीम ते । ओं० विष्णवे । ओं० जिष्णवे ॥९०॥ ओं० धन्विने । ओं० खड्गिणे । ओं०चर्मिणे । ओं० वर्मिणे । ओं०कर्मिणे। ओंधर्मिणे । ओं० भामिने । ओं० कामिने । ओं० योगिने । ओं० भोगिने । ओं० तिष्ठते ।

ॐ० गच्छते । ॐ०हेतवे । ॐ०सेतवे । ॐ०सर्वतः । ॐ०सर्वशः । ॐ०सर्वदा । ॐ०सर्वथः १०८॥ भव शर्व रुद्रहर शंकर भूतपते गिरिश गिरीश भर्ग शशिशेखर नीलगल । त्रिनयन वामदेव गिरिजाधव माररिपो जयजय देवदेव भगवन्भवतेऽस्तु नमः ॥ एतामष्टोत्तरशतनमस्कारसंस्कारपूतां भूतार्थव्याहृतिनुति-मुदाहृत्य मृत्युञ्जयस्य । कश्चिद्विद्वान्यदिह कुशलं सञ्चिनोति स्म किञ्चित्तेनान्येषां भवति पठतामीप्सितार्थस्य सिद्धिः । इति व्यासोक्तनिर्वाणस्तुतिः ॥ अथ शिवापराधक्षमापनस्तुतिः ॥ ॐ-आदौ कर्मप्रसङ्गात्कलयति कलुषे मातृकुक्षौ स्थितं मां विण्मूत्रा-मेध्यमध्ये क्वथयति नितरां जाठरो जातवेदाः । यद्यद्वै तत्र दुःखं व्यथयति विविधं शक्यते केन वक्तुं क्षन्तव्यो मेऽपराधः शिव शिव शिव भोः श्रीमहादेव शम्भो ॥१॥ बाल्ये दुःखाति-रेकान्मललुलितवपुः स्तन्यपाने पिपासी नो शक्यश्चेन्द्रियेभ्यो भवगुणजनितैर्जन्तुभिः संप्रदष्टः । नानारोगादिदुःखाद्रुदनपरवशः शङ्कर न स्मरामि क्षन्तव्यो मेऽपराधः० ॥२॥ प्रौढोऽहं यौवनस्थो विषयविषधरैः पञ्चभिर्मर्मसन्धौ दष्टो नष्टो विवेकात्सुतधन-युवतिस्वादुसौख्ये निषण्णः शैवीचिन्ताविहीनः परतपनरतो मान-गर्वाधिरूढः क्षन्तव्यो मे० ॥३॥ वार्धक्ये चेन्द्रियाणां विनति-गतमतिश्चाधिदैवाधिभूतैर्दुःखै रोगैर्वियोगैस्त्वनवसितवपुः प्रौढिही-नोऽतिदीनः । मिथ्यामोहाभिलाषैर्भ्रमन्नऽलिगणवत् धूर्जटेर्ध्यानभ्रष्टः क्षन्तव्यो० ॥४॥ स्नात्वा प्रत्यूषकाले स्नपनविधिकृते नाहृतं गाङ्गतोयं पूजार्थं वा कदाचिद्बहुतरगहनात्खण्डबिल्वीदलानि । नानीता पद्ममाला सरसि विकसिता गन्धपुष्पैस्त्वदर्थं क्षन्तव्यो० ॥५॥ स्थित्वा पद्मासनेहं प्रणवयुतमरुत्कुण्डलीसूक्ष्ममार्गाच्छान्ति नीते स्वस्वान्ते प्रकटितविभवं ज्योतिरूपं पराख्यम् । लिङ्गज्ञैर्ब्रह्मवाक्यैः सकलतनुगतं शङ्करं न स्मरामि क्षन्तव्यो

॥६॥ ध्यात्वा चित्ते शिवाख्यं प्रचुरतरधनं नैव दत्तं द्विजेभ्यो हव्यं ते लक्षसंख्यैर्हुतवहवदने नार्पितंबीजमन्त्रैः । नो तप्तं गाङ्गतीरे व्रतजपनियमैरुद्रजाप्यैर्न वेदैः क्षन्तव्यो० ॥७॥ दुग्धैर्मध्वाज्ययुक्तैर्दधिसितसहितैः स्नापितं नैव लिङ्गं नो लिप्तं चन्दनाद्यैः कनकविरचितैः पूजितं न प्रसूनैः । धूपैः कर्पूरदीपैर्विविधरसयुतैर्नैव भक्ष्योपहारैः क्षन्तव्यो० ॥८॥ नो शक्यं स्मार्तकर्म प्रतिपदगहनं प्रत्यभिज्ञातुमीषच्छ्रौतं वाक्यं कथं वा द्विजवरशमदं ब्रह्ममार्गप्रदीपम् । ज्ञेयो धर्मो विचारैः श्रवणमनु मया किं निदिध्यासितव्यं क्षन्तव्यो० ॥९॥ नग्नो निःसङ्गशुद्धस्त्रिगुणविरहितो ध्वस्तमोहान्धकारो नासाग्रे न्यस्तदृष्ट्या विदितभवगुणेनैव नेष्टः कदाचित् । उन्मत्तावस्थया त्वं विगतकलिमले स्वाशये नापि प्राप्तः क्षन्तव्यो० ॥१०॥ चन्द्रोद्भासितशेखरे स्मरहरे गङ्गाधरे शंकरे सर्पैर्भूषितकण्ठकर्णविवरे नेत्रोत्थवैश्वानरे । दन्तित्वक्कृतसुन्दराम्बरधरे त्रैलोक्यसारे हरे मोक्षार्थं कुरु चित्तवृत्तिमखिलामन्यैस्तु किं कर्मभिः ॥११॥ किंवाऽनेन धनेन वाजिकरिभिः प्राप्तेन राज्येन किं किंवा पुत्रकलत्रमित्रपशुभिर्देहेन गेहेन किम् । ज्ञात्वैतत् क्षणभङ्गुरं सपदि रे त्याज्यं मनो दूरतः स्वात्मस्थं गुरुवाक्यतो भज भज श्रीपार्वतीवल्लभम् ॥१२॥ आयुर्नश्यति पश्यतां प्रतिदिनं याति क्षयं यौवनं प्रत्यायान्ति गताः पुनर्न दिवसाः कालो जगद्भक्षकः । लक्ष्मीस्तोयतरङ्गभङ्गचपला विद्युच्चलं जीवितं तस्मान्मां शरणागतं शरणद त्वं रक्ष रक्षाधुना ॥१३॥ आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं पूजा ते विषयोपभोगरचना निद्रा समाधिस्थितिः । सञ्चारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरो यद्यत्कर्म करोमि तत्तदखिलं शम्भो तवाराधनम् ॥१॥ ब्रूषे नोत्तरमङ्ग पश्यसि न मामेतादृशं दुःखितं विज्ञप्ति बहुधा कृतां न शृणुषे नायासि

मन्मानसे । संसारार्णवगर्तमध्यपतितं प्रायेण नालम्बसे वाक्च-क्षुःश्रवणाद्रिन्द्रियगणरहितं त्वामाह सत्यं श्रुतिः ॥ २ ॥ कर-चरणकृतं वाक्कायजं कर्मजं वा श्रवणनयनजं वा मानसं वाऽप-राधम् । विदितमविदितं वा सर्वमेतत्क्षमस्व जय जय करुणाब्धे श्रीमहादेव शम्भो ॥ १४ ॥ इति शंकराचार्यकृता शिवापराध-क्षमापनस्तुतिः ॥ ॥ अथ रावणकृतदीनाक्रन्दाख्यशिवक्षमापणम् ॥ ॐगौरीश्वराय भुवनत्रयकारणाय भक्तप्रियाय भवभीतिभिदे भवाय । शर्वाय दुःखशमनाय वृषध्वजाय रुद्राय कालदहनाय नमः शिवाय ॥ १ ॥ सर्वेश्वरत्वे सति भस्मशायिने ह्युमापतित्वे सति चोर्ध्वरेतसे । वित्तेशभृत्ये सति चर्मवाससे निवृत्तरागाय नमस्तपस्विने ॥२॥ ॐकारेण विहीनस्य नित्यमुद्विग्नचेतसः । तापत्रयाग्नितप्तस्य त्राणं कुरु महेश्वर ॥३॥ कायपोषणसक्तस्य रोगशोकाकुलस्य च । भवार्णवनिमग्नस्य त्राणं० ॥ ४ ॥ मदनोरगदष्टस्य क्रोधाग्निज्वलितस्य च । लोभमोहादिसक्तस्य त्राणं० ॥ ५ ॥ तृष्णाश्रृङ्खलया नाथ बद्धस्य भवपञ्जरे । कृपार्द्रदीनचित्तस्य त्राणं० ॥ ६ ॥ भटैर्नानाविधैर्घोरैर्यमस्याज्ञा-विधायकैः । तां दिशं नीयमानस्य त्राणं० ॥ ७ ॥ दुष्टस्य नष्टचित्तस्य श्रेष्ठमार्गोज्झितस्य च । अनाथस्य जगन्नाथ त्राणं० ॥ ८ ॥ संसारपाशदृढबन्धनपीडितस्य मोहान्धकारविषमेषु निपातितस्य । कामार्दितस्य भयरागखलीकृतस्य दीनस्य मे कुरु दयां परलोकनाथ ॥ ९ ॥ दीनोस्मि मन्दधिषणोस्मि निराश्रयोस्मि दासोस्मि साधुजनतापरिवर्जितोस्मि । दुष्टास्मि दुर्भगतमोस्मि गतत्रपोस्मि धर्मोज्झितोस्मि विकलोस्मि कलङ्कि-तोस्मि ॥१०॥ भीतोस्मि भङ्गुरतमोस्मि भयानकोस्मि शंकाश-तव्यतिकराकुलचेतनोस्मि । रागादिदोषनिकरैर्मुखरीकृतोस्मि सत्यादिशौचनियमैः परिवर्जितोस्मि ॥ ११ ॥ जन्माटवीभ्रमणमा-

रुतखेदितोस्मिनित्यामयोस्म्यऽशरणोस्म्यऽसमञ्जसोस्मि । आशानिरङ्कुशपिशाचिकयार्दितोस्मि हास्योस्मि हा पशुपते शरणागतोस्मि ॥१२॥ हा हतोस्मि विनष्टोस्मि दष्टोस्मि चपलेन्द्रियैः । भवार्णवनिमग्नोस्मि किं त्रातुं मम नार्हसि ॥१३॥ यदि नास्मि महापापी यदि नास्मि भयातुरः । यदि नेन्द्रियसंसक्तस्तत्कोर्थः शरणे मम ॥१४॥ आर्तो मत्सदृशो नान्यस्त्वत्तो नान्यः कृपापरः । तुल्य एवावयोर्योगः कथं नाथ न पाहि माम् ॥ १५ ॥ आकर्णयाऽशु कृपणस्य वचांसि सम्यक् लब्धोसि नाथ बहुभिर्ननु जन्मवृन्दैः । अद्य प्रभो यदि दयां कुरुषे न मे त्वं त्वत्तः परं कथय कं शरणं व्रजामि ॥ १६ ॥ द्वेष्योहं सर्वजन्तूनां बन्धूनां च विशेषतः । सुहृद्वर्गस्य सर्वस्य किमन्यत्कथयामि ते ॥१७॥ मातापितृविहीनस्य दुःखशोकातुरस्य च । आशापाशनिबद्धस्य रागद्वेषयुतस्य च ॥१८॥ देवदेव जगन्नाथ शरणागतवत्सल । नान्यस्त्रातास्ति मे कश्चित्त्वदृते परमेश्वर ॥१९॥ भीतोस्मि कालवशगोस्मि निराश्रयोस्मि खिन्नोस्मि दुःखजलधौ पतितोस्मि शम्भो । आर्त्तोस्मि मोहपटलेन समावृतोस्मि त्वां चन्द्रचूड शरणं समुपागतोस्मि ॥२०॥ आशिखान्तं निमग्नोस्मि दुस्तरे भवकर्दमे । प्रसीद कृपया शम्भो पादाग्रेणोद्धरस्व माम् ॥२१॥ श्रुत्वा मे भवभीतस्य भगवन्करुणा गिरः । तथा कुरु यथा भूयो न बाधन्ते भवापदः ॥२२॥ समयशतविलुप्तं भक्तिहीनं कुचैलं मलिनवसनगात्रं निर्दयं पापशीलम् । रविजभ्रुकुटिभीतं रोगिणं प्राप्तदुःखं खलजनपरिभूतं रक्ष मां सर्वशक्ते ॥२३॥ आपन्नोस्मि शरण्योसि सर्वावस्थासु सर्वदा । भगवंस्त्वां प्रपन्नोस्मि रक्ष मां शरणागतम् ॥ २४ ॥ जातस्य जायमानस्य गर्भस्थस्यापि देहिनः । माभूत्तत्र कुले जन्म यत्र शम्भुर्न दैवतम् ॥२५॥ शङ्करस्य च ये भक्ताः शान्तास्तद्गतमानसाः । तेषां दासस्य दासोहं भूयां जन्मनि जन्मनि

॥ २६ ॥ नमस्कारादिसंयुक्तं शिवइत्यक्षरद्वयम् । जिह्वाग्रे वर्तते यस्य सफलं तस्य जीवितम् ॥ २७ ॥ यत्कृतं यत्करिष्यामि तत्सर्वं न मया कृतम् । त्वया कृतं तु फलभुक्त्वमेव परमेश्वर ॥२८॥ यदक्षरपदभ्रष्टं मात्राहीनं च यद्भतम् । मया दासेन विज्ञप्तं क्षम्यतां परमेश्वर ॥२९॥ इति श्रीरावण-कृता दीनाक्रन्दनस्तुतिः ॥

★ ★ ★

(२१) बहुरूपगर्भस्तोत्रम् ।

शिवपूजायाम् ।

ॐ नमः स्वच्छन्दभैरवाय ॥ ब्रह्मादिकारणातीतं स्वशक्तया-नन्दनिर्भरम् । नमामि परमेशानं स्वच्छन्दं वीरनायकम् ॥१॥ कैलासशिखरासीनं देवदेवं जगद्गुरुम् । पप्रच्छ प्रणता देवी भैरवं विगतामयम् ॥२॥ "श्रीदेव्युवाच" प्रायश्चित्तेषु सर्वेषु समयोल्लङ्घनेषु च । महाभयेषु घोरेषु तीव्रोपद्रवभूमिषु ॥३॥ च्छिद्रस्थानेषु सर्वेषु सदुपायं वद प्रभो । येनायासेन रहितो निर्दोषश्च भवेन्नरः ॥४॥ "श्रीभैरवः" शृणु देवि परं गुह्यं रहस्यं परमाद्भुतम् । सर्वपापप्रशमनं सर्वदुःखनिवारणम् ॥५॥ प्रायश्चित्तेषु सर्वेषु तीव्रेष्वऽपि विमोचनम् । सर्वच्छिद्रापहरणं सर्वार्तिविनिवारकम् ॥६॥ समयोल्लङ्घने घोरे जपादेव विमोचनम् । भोगमोक्षप्रदं देवि सर्वसिद्धिफलप्रदम् ॥७॥ शतजाप्येन शुद्ध्यंति महापातकिनोऽपि ये । तदऽर्धं पातकं हन्ति-तत्पादेनोपपातकम् ॥८॥ कायिकं वाचिकं चैव मानसं स्पर्शदोषजम् । प्रमादादिच्छया वाऽपि सकृज्जाप्येन शुद्ध्यति ॥९॥

यागारम्भे च यागान्ते पठितव्यं प्रयत्नतः । नित्ये नैमित्तिके काम्ये परस्याप्यात्मनोऽपि वा ॥१०॥ निश्छिद्रकरणं प्रोक्तं स्वभावपरिपूरणम् । द्रव्यहीने मन्त्रहीने यज्ञयोगविवर्जिते ॥११॥ भक्तिश्रद्धाविरहिते शुद्धिशून्ये विशेषतः । मनोविक्षेपदोषे च विलोपे पशुवीक्षिते ॥ १२ ॥ विधिहीने प्रमादे च जप्तव्यं सर्वकर्मसु । नाऽतः परतरो मन्त्रो नातः परतरा स्तुतिः ॥१३॥ नातः परतरा काचित्सम्यक्प्रत्यङ्गिरा प्रिये । इयं समयविद्यानां राजराजेश्वरीश्वरि ॥१४॥ परमाऽप्यायनं देवि भैरवस्य प्रकीर्तितम् । प्रीणनं सर्वदेवानां सर्वसौभाग्यवर्धनम् ॥१५॥ स्तवराजमिमं पुण्यं श्रृणुष्वाऽवहिता प्रिये ॥ १६ ॥ ("अस्य श्रीबहुरूपभट्टारकस्तोत्रस्य, श्रीवामदेव ऋषिः, अनुष्टुप्छन्दः, श्रीबहुरूपभट्टारको देवता, आत्मनो० चतुर्वर्गसिद्ध्यर्थे पाठे विनियोगः ॥ न्यासं कृत्वा प्राणायामः ॥ ") वामे खेटकपाशशाङ्र्गविलसद्दण्डं च वीणाण्टिके बिभ्राणं ध्वजमुद्गरौ स्वनिभदे व्यङ्कं कुठारं करे । दक्षेस्यऽङ्कुशकन्दलेषुडमरून्वज्रत्रिशूलाभयान्त्रुद्रस्थं शरवत्क्रमिन्दुधवलं स्वच्छन्दनाथं स्तुमः ॥ ॐ वहुरूपाय विद्महे कोटराक्षाय धीमहि । तन्नोऽघोरः प्रचोदयात् ॥ ३ ॥ ("मूलं । अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यश्च । सर्वथा शर्व सर्वेभ्यो नमस्ते रुद्ररूपेभ्यः") १०८, ॐ श्रीभैरवः ॥ ॐनमः परमाकाशशायिने परमात्मने । शिवाय परसंशान्तनिरानन्दपदाय ते ॥१॥ अवाच्यायाऽप्रमेयाय प्रमात्रे विश्वहेतवे । महासामान्यरूपाय सत्तामात्रैकरूपिणे ॥२॥ घोषादिदशधाशब्दबीजभूताय शम्भवे । नमः शान्तोग्रघोरादिमन्त्रसन्दर्भगर्भिणे ॥ ३ ॥ रेवतीसङ्गविस्रम्भसमाश्लेषविलासिने । नमः समरसास्वादपरानन्दोपभोगिने ॥ ४ ॥ भोगपाशे नमस्तुभ्य योगीशैः पूजितात्मने । द्वयनिर्दलनोद्योगसमुल्लासि-

तमूर्तये ॥ ५ ॥ सत्त्वप्रसरविक्षोभविसृष्टाऽखिलजन्तवे । नमो मायास्वरूपाय स्थाणवे परमेष्ठिने ॥ ६ ॥ घोरसंसारसंभोगदायिने स्थितिकारिणे ॥ कालादिक्षितिपर्यन्तपालिने विभवे नमः ॥ ७ ॥ रेहनाय महामोहध्वान्तविध्वंसहेतवे । हृदयाम्भोजसंकोचभेदिने शिवभानवे ॥ ८ ॥ भोगमोक्षफलप्राप्तिहेतुयोगविधायिने । नमः परमनिर्वाणदायिने चन्द्रमौलये ॥ ९ ॥ घोष्याय सर्वमन्त्राणां सर्ववाङ्मयमूर्तये । नमः शर्वाय सर्वाय सर्वपाशापहारिणे ॥ १० ॥ रवणाय रवान्ताय नमस्ते रावराविणे । नित्याय सुप्रबुद्धाय सर्वान्तरतमाय ते ॥११॥ घोषाय परनादान्तश्चराय खचराय ते । नमो वाक्पतये तुभ्य भवाय भवभेदिने ॥ १२ ॥ रमणाय रतीशाङ्गदाहिने चित्रकर्मिणे । नमः शैलसुताभर्त्रे विश्वकर्त्रे महात्मने ॥ १३ ॥ नमः पारप्रतिष्ठाय सर्वान्तपदगाय ते । नमः समस्ततत्त्वाध्वव्यापिने चित्स्वरूपिणे ॥१४॥ रेवद्रराय रुद्राय नमस्ते रूपरूपिणे । परापरपरिस्पन्दमन्दिराय नमो नमः ॥ १५ ॥ भरिताखिलविश्वाय योगगम्याय योगिने । नमः सर्वेश्वरेशाय महाहंसाय शम्भवे ॥ १६ ॥ चर्च्याय चर्चनीयाय चर्चकाय चराय ते । रवीन्दुसन्धिसंस्थाय महाचक्रेश ते नमः ॥ १७ ॥ सर्वानुस्यूतरूपाय सर्वाच्छादकशक्तये । सर्वभक्षाय सर्वाय तमस्ते सर्ववेदिने ॥ १८ ॥ रम्याय वल्लभाक्रान्तदेहार्धाय विनोदिने । नमः प्रपन्नदुष्प्राप्यसौभाग्यफलदायिने ॥ १९ ॥ तन्महेशाय तत्त्वार्थवेदिने भववेदिने । महाभैरवनाथाय भक्तिगम्याय ते नमः ॥ २० ॥ शक्तिगर्भप्रबोधाय शरण्यायाऽशरीरिणे । शान्तिपुष्ट्यादिसाध्यार्थसाधकाय नमोऽस्तु ते ॥ २१ ॥ रवत्कुण्डलिनीगर्भप्रबोधप्राप्तशक्तये । उत्स्फोटनापटुप्रौढपरमाक्षरमूर्तये ॥ २२ ॥ समस्तव्यस्तसंग्रस्तरश्मिजालोदरात्मने । नम-

स्तुभ्यं महामीनरूपिणे विश्वगर्भिणे ॥ २३ ॥ रेवारणिसमुद्भूत-वह्निज्वालावभासिने । घनीभूतविकल्पात्मविश्वबन्धविभेदिने ॥ २४ ॥ भोगिनीस्यन्दनारूढिपौढिमालब्धगर्विणे । नमस्ते सर्वभक्ष्याय परमामृतलाभिने ॥ २५ ॥ णफकोटिसमावेश-भरिताखिलसृष्टये । नमः शक्तिशरीराय कोटिद्वितयसङ्गिने ॥२६॥ महामोहमलाक्रान्तजीववर्गप्रबोधिने । महेश्वराय जगतां नमः कारणबन्धवे ॥ २७ ॥ स्तेनोन्मूलनदक्षैकस्मृतये विश्वमूर्तये । नमस्तेस्तु महादेवनाम्ने परस्वधात्मने ॥२८॥ रुद्राविणे महा-वीर्यरुरुवंशविनाशिने । रुद्राय द्राविताशेषबन्धनाय नमोनमः ॥२९॥ द्रवत्पररसास्वादचर्वणोद्युक्तशक्तये । नमस्त्रिदशपूज्याय सर्व-कारणहेतवे ॥३०॥ रूपातीत नमस्तुभ्यं नमस्ते वहुरूपिणे । त्र्यम्ब-काय त्रिधामान्तश्चारिणे च त्रिचक्षुषे ॥३१॥ पेशलोपायलभ्याय भ्रान्तिभाजां महात्मने ॥३२॥ दुर्लभाय मलाक्रान्तचेतसां तु नमोनमः ॥३२॥ भवप्रदाय दुष्टानां भवाय भवभेदिने । भव्यानां तन्मयानां तु सर्वदाय नमोनमः ॥३३॥ अणूनां मुक्तये घोरघोर-संसारदायिने । घोरातिघोरमूढानां तिरस्कर्त्रे नमोनमः ॥३४॥ इत्येवं स्तोत्रराजेशं महाभैरवभाषितम् । योगिनीनां परं सारं न दद्याद्यस्य कस्यचित् ॥ अदीक्षिते शठे क्रूरे निःसत्ये शुचिवर्जिते । नास्तिके च खले मूर्खे प्रमत्ते विप्लुतेऽलसे ॥ गुरुशास्त्रसदा-चारदूषके कलहप्रिये । निन्दके चुम्भके क्षुद्रेऽसमयज्ञे च दाम्भिके ॥ दाक्षिण्यरहिते पापे धर्महीने च गर्विते । भक्तियुक्ते प्रदातव्यं न देयं परदीक्षते ॥ पशूनां सन्निधौ देवि नोच्चार्यं सर्वथा क्वचित् । अस्यैव स्मृतमात्रस्य विघ्ना नश्यन्ति सर्वशः गुह्यका यातुधानाश्च वेताला राक्षसादयः । डाकिन्यश्च पिशाचाश्च क्रूर-सत्वाश्च पूतनाः ॥ नश्यन्ति सर्वे पठितस्तोत्रस्यास्य प्रभावतः । खेचरी भूचरी चैव डाकिनी शाकिनी तथा ॥ ये चान्ये बहुधा भूता

दुष्टसत्त्वा भयानकाः । व्याधिदौर्भिक्षदौर्भाग्यमारीमोहविषादयः ॥
गजव्याघ्रादयो भीताः पलायन्ते दिशो दश । सर्वे दुष्टाः प्रण-
श्यन्ति चेत्याज्ञा पारमेश्वरी ॥ इति श्रीललितस्वच्छन्दे बहुरूप-
गर्भस्तोत्र राजः सम्पूर्णः ॥

❀ ❀ ❀

(२२) अथ साम्बसदाशिवकवचस्तोत्रम्

अस्य श्रीसाम्बसदाशिवकवचराजस्य, ऋषभयोगीश्वर
ऋषिः, अनुष्टुप्च्छन्दः श्रीसाम्बसदाशिवो देवता, ॐ बीजं, नमः
शक्तिः, शिवायेति कीलकं, श्रीसाम्बसदाशिवप्रीत्यर्थे पाठे विनि-
योगः ॥ ॐ अङ्गुष्ठाभ्यां नमः, न तर्जनीभ्यां नमः, मः मध्य-
माभ्यां नमः, शिअनामिकाभ्यां नमः वा कनिष्ठकाभ्यां नमः,
य करतलकरपृष्ठभ्यां नमः ॥ ॐ हृदयाय नमः, न शिरसे
स्वाहा, मः शिखायै वषट्, शि कवचाय हुँ, वा नेत्राभ्यां
वौषट्, य अस्त्राय फट् । प्राणायामः ॥ ध्यानं । ध्यायेन्नित्यं
महेशं रजतगिरिनिभं चारुचन्द्रावतंसं रत्नाकल्पोज्ज्वलाङ्गं
परशुमृगवराभीतिहस्तं प्रसन्नम् । पद्मासीनं समन्तात् स्तुतममर-
गणैर्व्याघ्रकृत्तिं वसानं विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पञ्चवक्त्रं
त्रिनेत्रम् ॥ "तत्पुरुषाय विद्महे, महादेवाय धीमहि, तन्नो रुद्रः
प्रचोदयात्" ॥३॥ ऋषभ उवाच ॥ नमस्कृत्य महादेवं विश्व-
व्यापिनमीश्वरम् । वक्ष्ये शिवमयं वर्म सर्वरक्षाकरं नृणाम् ॥१॥
शुचौ देशे समासीनो यथावत्कल्पितासनः । जितेन्द्रियो जित-
प्राणश्चिन्तयेच्छिवमव्ययम् ॥२॥ हृत्पुण्डरीकान्तरसन्निविष्टं स्व-
तेजसा व्याप्तनभोवकाशम् । अतीन्द्रियं सूक्ष्ममनन्तमाद्यं ध्याये-
त्परानन्दमयं महेशम् ॥३॥ ध्यानावधूताखिलकर्मबन्धश्चिरं चिदा-

न्दनिमग्नचेताः । षडक्षरन्याससमाहितात्मा शैवेन कुर्यात्कवचेन रक्षाम् ॥४॥ मां पातु देवोऽखिलदेवतात्मा संसारकूपे पतितं गंभीरे । यन्नाम दिव्यं वरमन्त्रमूलं धुनोतु मे सर्वमघं हृदिस्थम् ॥५॥ सर्वत्र मां रक्षतु विश्वमूर्तिर्ज्योतिर्मयानन्दघनश्चिदात्मा । अणोरणीयानुरुशक्तिरेकः स ईश्वरः पातु भयादशेषात् ॥६॥ यो भूस्वरूपेण बिभर्ति विश्वं पायात्स भूमेर्गिरिशोऽष्टमूर्तिः । योऽपां स्वरूपेण नृणां करोति सञ्जीवनं सोऽवतु मां जलेभ्यः ॥७॥ कल्पावसाने भुवनानि दग्ध्वा सर्वाणि यो नृत्यति भूरिलीलः । स कालरुद्रोऽवतु मां दवाग्नेर्वात्यादिभीतेर्निखिलाच्च तापात् ॥८॥ यो वायुरूपेण चलत्वमाप प्राणादिभिः सोऽवतु मां दृढाय । सव्योमरूपो निखिलावकाशो ह्याकाशरूपेण करोतु रक्षाम् ॥९॥ यः कालकृत्कालभयाच्च सोऽव्यात् दिवाकरत्वेन जगत्त्रये माम् । निशाकरत्वेन वनस्पतीशो यो वा मनः सोऽवतु निश्चलाय ॥ १० ॥ यो वेद नाम व्यवहारभोक्ता जीवस्वरूपेण हृषीकसाक्षी । स पातु सत्कर्मफलप्रदो मां मखाग्र्यविध्वंसकयज्ञमूर्तिः ॥११॥ प्रदीप्तविद्युत्कनकावभासो विद्यावराभीतिकुठारपाणिः । चतुर्मुखस्तत्पुरुषस्त्रिनेत्रः प्राच्यां स्थितं रक्षतु मामजस्रम् ॥१२॥ कुठारवेदाङ्कुशपाशशूलकपालढक्काक्षगुणान्ददानः । चतुर्मुखो नीलरुचिस्त्रिनेत्रः पायादघोरो दिशि दक्षिणस्याम् ॥१३॥ कुन्देन्दुशङ्खस्फटिकावभासो वेदाक्षमालावरदाभयाङ्कः । त्र्यक्षश्चतुर्वक्त्र उरुप्रभावः सद्योधिजातोऽवतु मां प्रतीच्याम् ॥१४॥ वराक्षमालाभयढक्काहस्तः सरोजकिञ्जल्कसमानवर्णः त्रिलोचनश्चारुचतुर्मुखो मां पायादुदीच्यां दिशि वामदेवः ॥ १५ ॥ वेदाभयेष्टाङ्कुशपाशटङ्ककपालढक्काक्षत्रिशूलपाणिः । सितद्युतिः पञ्चमुखोऽवतान्मामीशान ऊर्ध्वं परमप्रकाशः ॥१६॥ मूर्धानमव्यान्मम चन्द्रमौलिर्भालं ममा-

व्यादऽथ भालनेत्रः । नेत्रे ममाव्याद्भगनेत्रहारी नासां सदा रक्षतु विश्वनाथः ॥१७॥ पायाच्छ्रुती मे श्रुतिगीतकीर्तिः कपोलमव्यात्सततं कपाली । वक्त्रं सदा रक्षतु पञ्चवक्त्रो जिह्वां सदा रक्षतु वेदजिह्वः ॥१८॥ कण्ठं गिरीशोऽवतु नीलकण्ठः स्कन्दौ वृषस्कन्दगतः सदाव्यात् । स्तनद्वयं पातु सदा महेशः पार्श्वद्वयं मे भगवान्गिरीशः ॥१९॥ भुजद्वयं पातु भुजङ्गधारी पाणिद्वयं पातु पिनाकपाणिः । दोर्मूलमव्यान्मम धर्मबाहुर्वक्षः-स्थलं दक्षमखान्तकोऽव्यात् ॥२०॥ ममोदरं पातु गिरीन्द्रधन्वा मध्यं ममाव्यान्मदनान्तकारी । हेरम्बतातो मम पातु नाभिं पायात्कटिं धूर्जटिरीश्वरो मे ॥ २१ ॥ गुह्यं हरो रक्षतु वासुकीशः पृष्ठं ममाव्याद्भगनापगेशः । ऊरुद्वयं पातु कुबेरमित्रो जानुद्वये मे जगदीश्वरोऽव्यात् ॥२२॥ जण्घाद्वयं पुङ्गवकेतुरव्यात्पादौ ममाव्यात्सुरवन्द्यपादः । पायान्ममान्तःकरणं परात्मा सर्वाङ्गमव्यान्मम सर्वगुप्तः ॥ २३ ॥ महेश्वरः पातु दिनाद्ययामे मां मध्ययामेऽवतु वामदेवः । त्रिलोचनः पातु तृतीययामे वृषध्वजः पातु दिनान्तयामे ॥२४॥ पायान्निशादौ शशिशेखरो मां गङ्गाधरो रक्षतु मां निशीथे । गौरीपतिः पातु निशावसाने मृत्युञ्जयो रक्षतु सर्वकालम् ॥२५॥ अन्तःस्थितं रक्षतु शंकरो मां स्थाणुः सदा पातु बहिःस्थितं माम् । तदन्तरे पातु पतिः पशूनां सदाशिवो रक्षतु मां समन्तात् ॥२६॥ तिष्ठन्तमव्याभ्दुवनैकनाथः पायाद्व्रजन्तं प्रमथाधिनाथः । वेदान्तवेद्योऽवतु मां निषण्णं मामव्ययः पातु शिवः शयानम् ॥२७॥ मार्गेषु मां रक्षतु नीलकण्ठः शैलादिदुर्गेषु पुरत्रयारिः । अरण्यवासादिमहाप्रवासे पायान्मृगव्याधउदारशक्तिः ॥२८॥ कल्पान्तकालोग्रपटुप्रकोपस्फुटाट्टहासोच्चलिताण्डकोशः । घोरारिसेनार्णवदुर्निवारमहाभयाद्रक्षतु वीरभद्रः ॥२९॥ पत्त्यश्वमातङ्गरथावरूथवत्सह-

स्रलक्षायुतकोटिभीषणम् । अक्षौहिणीनां शतमाततायिनां छिन्द्या-न्मृडो घोरकुठारधारया ॥३०॥ निहन्तु दस्यून्प्रलयानलार्चिर्ज्व-लत्त्रिशूलं त्रिपुरान्तकस्य । शार्दूलसिंहर्क्षवृकादिहिंस्रान्सन्त्रास-यत्वीशधनुः पिनाकः ॥३१॥ दुःस्वप्नदुःशकुनदुर्गमदौर्मनस्यदुर्भिक्ष-दुर्व्यसनदुःसहदुर्यशांसि । उत्पातशापविषभीतिमसन्दग्रहार्ति व्याधींश्च नाशयतु मे जगतामधीशः ॥३२॥ ॐ नमो भगवते सदाशिवाय सकलतत्त्वात्मकाय सर्वयन्त्राधिष्ठिताय सर्वतन्त्रस्वरूपाय सर्वमन्त्र-स्वरूपाय सर्वतत्त्वविदुराय ब्रह्मरुद्रावतारिणे नीलकण्ठाय पार्व-तीमनोहरप्रियाय सोमसूर्याग्निलोचनाय भस्मोद्धूलितविग्रहाय महामुकुटधारिणे माणिक्यभूषणाय सृष्टिस्थितिप्रलयकालाग्निरुद्रा-वताराय दक्षाध्वरध्वंसकाय महाकालभेदनाय मूलाधारैकनिलयाय तत्त्वातीताय गङ्गाधराय सर्वदेवाधिदेवाय षडाश्रयाय वेदान्त-साराय त्रिवर्गसाधनाय अनेककोटिब्रह्माण्डजनकाय अनन्तवासु-कितक्षककार्कोटकशङ्खपालकुलिकपद्ममहापद्मेत्यष्टनागकुलभूषणाय प्रणवस्वरूपाय चिदाकाशाय आकाशदिक्स्वरूपाय सकलग्रहनक्ष-त्रमालिने सकलाय सकलकलङ्करहिताय सकललोकैककर्त्रे सक-ललोकैकभर्त्रे सकललोकैकगुरवे सकललोकैकसाक्षिणे सकल-लोकैकवरप्रदाय सकलनिगमगुह्याय सकलवेदान्तपारगाय सक-लदुरितार्तिभञ्जनाय सकलजगदभयङ्कराय सकललोकैकश-ङ्कराय शशाङ्कशेखराय शाश्वतनिजावासाय निर्गुणाय नीरूपाय निराभासाय निरामयाय निरातंकाय निष्प्रपञ्चाय निष्कलङ्काय निर्द्वन्द्वाय निःसङ्गाय निर्मलाय निर्गमाय निरुपम-विभवाय निर्भयाय निर्लोभाय निष्क्रोधाय निश्चिन्ताय निरहं-काराय निराकुलाय निराधाराय नित्यशुद्धबुद्धपरिपूर्णसच्चिदान-न्दाय परमशान्तप्रकाशतेजोरूपाय तेजोमयाय जय जय रुद्र महारुद्रवीरभद्रावतार महाभैरव कालभैरव कल्पान्तभैरव कपा-

लमालाधर खट्वाणगखणगचर्मपाशांकुशडमरुकशूलचापबाणगदा-शक्तिभिण्डिपालतोमरमुसलमुद्गरप्रासपट्टिशपाशपरशुपरिघभुसण्डीश-तघ्नीचक्राद्यायुधभीषणाकर सहस्रमुख दंष्ट्राकरालविकटाट्टहासवि-स्फारितब्रह्माण्डमण्डल नागेन्द्रकुण्डल नागेन्द्रहारवलय नागेन्द्रच-र्माम्बरधर मृत्युञ्जय त्र्यंबकत्रिपुरान्तक विरूपाक्ष विश्वेश्वर विश्व-रूप वृषभवाहन विषभीषण विश्वतोमुख सर्वतो मां रक्ष रक्ष ज्वल ज्वल प्रज्वल २ महामृत्युभयं नाशय २ विषसर्पभयं शमय २ रोगभयमुत्सादय २ चोरभयं नाशय २ चोरान्मारय २ मम-शत्रून् उच्चाटय २ त्रिशूलेन विदारय २ कुठारेण भिन्धि २ खड्गेन छिन्धि २ खट्वाण्गेन विपोथय २ मुसुलेन निष्पेषय २ बाणैः सन्ताडय २ तृतीयनेत्रेण सन्तापय २ रक्षांसि भीषय २ भूतान् विद्रावय २ कूष्माण्ड़वेतालभूतमारीब्रह्मराक्षसगणान् सन्त्रासय २ ममाऽभयं कुरु २ वित्रस्तं मामाश्वासय २ नरकम-हाभयान्मामुद्धर २ संजीवय २ क्षुत्तड्भ्यां मामाप्यायय २ दुःखातुरं मामानन्दय २ शिवकवचेन मामाच्छादय २ त्र्यम्बक सदाशिव नमस्ते नमस्ते नमस्ते ॥ ऋषभ उवाच । इतीदं कवचं शैवं वरदं व्याहृतं मया । सर्वबाधाप्रशमनं रहस्यं सर्वदेहिनाम् ॥१॥ यः सदा धारयेन्मर्त्यः शैवं कवचमुत्तमम् । न तस्य जायते क्वापि भयं शम्भोरनुग्रहात् ॥ २ ॥ क्षीणायुः प्राप्तमृत्युर्वा महारोगहतोऽपि वा । सद्यः सुखमवाप्नोति दीर्घ-मायुश्च विन्दति ॥ ३ ॥ सर्वदारिद्र्यशमनं सर्वमणगल्यवर्धनम् । यो धत्ते कवचं शैवं स देवैरपि पूज्यते ॥ ४ ॥ महापातक-संघातैर्मुच्यते चोपपातकैः । देहान्ते मुक्तिमाप्नोति शिव-वर्मानुभावतः ॥ ५ ॥ त्वमपि श्रद्धया वत्स शैवं कवचमुत्तमम् । धारयस्व मया धत्तं सद्यः श्रेयो ह्यवाप्स्यसि ॥ ६ ॥ इति श्रीस्कन्दपुराणे शिवकवचं सम्पूर्णम ॥ ★ ★ ★

॥ श्रीरस्तु ॥

(२३) गायत्रीसहस्रनामस्तोत्रम् ।

ध्यानम्—

मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्षणैर्युक्तामिन्दुनिबद्धरत्नमुकुटां तत्त्वार्थवर्णात्मिकाम् । गायत्रीं वरदाभयाण्कुशकशाःशुभ्रं कपालं गुणं शङ्खंचक्रमथारविन्दयुगलंहस्तैर्वहन्तीं भजे ॥

ओं आयातु वर्दा देवी त्रिक्षरी ब्रह्मवादिनी ।
गायत्री छन्साः मातर ब्रह्मयोनि नमस्तुते ३

ॐ तत्काररूपा तत्त्वाज्ञा तत्पदार्थस्वरूपिणी ।
तपस्स्वाध्यायनिरता तपस्विजनसंनुता ॥ १ ॥

तत्कीर्तिगुणसम्पन्ना तथ्यवाक्च तपोनिधिः ।
तत्त्वोपदेशसम्बन्धा तपोलोकनिवासिनी ॥ २ ॥

तरुणादित्यसंकाशा तप्तकाञ्चनभूषणा ।
तमोऽपहारिणी तन्त्री तारिणी ताररूपिणी ।३।

तलादिभुवनान्तःस्था तर्कशास्त्रविधायिनी ।
तन्त्रसारा तन्त्रमाता तन्त्रमार्गप्रदर्शिनी ॥ ४ ॥

तत्त्वा तन्त्रविधानज्ञा तन्त्रस्था तन्त्रसाक्षिणी ।
तदेकध्याननिरता तत्त्वज्ञानप्रबोधिनी ॥५॥

तन्नाममन्त्रसुप्रीता तपस्विजनसेविता ।
सकाररूपा सावित्री सर्वरूपा सनातनी ॥६॥

संसारदुःखशमनी सर्वयागफलप्रदा ।
सकला सत्यसंकल्पा सत्यासत्यप्रदायिनी ॥७॥

संतोषजननी सारा सत्यलोकनिवासिनी ।
समुद्रतनयाराध्या सामगानप्रिया सती ॥८॥

समाना सामदेवी च समस्तसुरसेविता ।
सर्वसम्पत्तिजननी सद्गुणा सकलेष्टदा ॥ ९ ॥

सनकादिमुनिध्येया समानाधिकवर्जिता ।
साध्या सिद्धा सुधावासा सिद्धिःसाध्यप्रदायिनी ।१०।

सद्युगाराध्यनिलया समुत्तीर्णा सदाशिवा ।
सर्ववेदान्तनिलया सर्वशास्त्रार्थगोचर ॥११॥ (स० ७)

सहस्रदलपद्मस्था सर्वज्ञा सर्वतोमुखी ।
समया समयाचारा सदसद्ग्रन्थिभेदिनी ॥१२॥

सप्तकोटिमहामन्त्रमाता सर्वप्रदायिनी ।
सगुणा सम्भ्रमा साक्षा सर्वचैतन्यरूपिणी ॥१३॥

सत्कीर्तिः सात्त्विकी साध्वी सच्चिदानन्दरूपिणी ।
संकल्परूपिणी संध्या सालग्रामनिवासिनी ॥१४॥

सर्वोपाधिविनिर्मुक्ता सत्यज्ञानप्रबोधिनी ।
विकाररूपा विप्रश्रीर्विप्राराधनतत्परा ॥१५॥

विप्रप्रीर्विप्रकल्याणी विप्रवाक्यस्वरूपिणी ।
विप्रमन्दिरमध्यस्था विप्रवादविनोदिनी ॥१६॥

विप्रोपाधिविनिर्भेत्री विप्रहत्याविमोचनी ।
विप्रत्राताविप्रगोत्राविप्रगोत्रविवर्धिनी ॥१७॥

विप्रभोजनसंतुष्टा विष्णुरूपा विनोदिनी ।
विष्णुमाया विष्णुवन्द्या विष्णुगर्भाविचत्रिणी ॥१८॥

वैष्णवी विष्णुभगिनी विष्णुमायाविलासिनी ।
विकाररहिता विश्वविज्ञानघनरूपिणी ॥१९॥

विबुधा विष्णुसंकल्पा विश्वामित्रप्रसादिनी ।
विष्णुचैतन्यनिलया विष्णुस्वा विश्वसाक्षिणी ।२०।

विवेकिनी वियद्रूपा विजया विश्वमोहिनी ।
विद्याधरी विधानज्ञा वेदतत्त्वार्थरूपिणी ॥२१॥

विरूपाक्षी विराड्रूपा विक्रमा विश्वमणगला ।
विश्वम्भरासमाराध्याविश्वभ्रमणकारिणी ॥ २२ ॥

विनायकी विनोदस्था वीरगोष्ठीविवर्धिनी ।
विवाहरहिता विन्ध्या विन्ध्याचलनिवासिनी ॥२३॥
विद्याविद्याकरी विद्या विद्याविद्याप्रबोधिनी ।
विमला विभवा वेद्या विश्वस्था विविधोज्ज्वला ॥२४॥
वीरमध्या वरारोहा वितन्त्रा विश्वनायिका ।
वीरहत्याप्रशमनी विनम्रजनपालिनी ॥२५॥
वीरधीर्विविधाकारा विरोधिजननाशिनी ।
तुकाररूपा तुर्यश्रीस्तुलसीवनवासिनी ॥ २६ ॥
तुरङ्गी तुरगारूढा तुलादानफलप्रदा ।
तुलामाघस्नानतुष्टा तुष्टिपुष्टिप्रदायिनी ॥२७॥
तुरङ्गमप्रसंतुष्टा तुलिता तुल्यमध्यगा ।
तुङ्गोत्तुङ्गा तुङ्गकुचा तुहिनाचलसंस्थिता ।२८।
तुम्बुरादिस्तुतिप्रीता तुषारशिखरीश्वरी ।
तुष्टा च तुष्टिजननी तुष्टलोकनिवासिनी ॥२९॥
तुलाधारा तुलामध्या तुलस्था तुर्यरूपिणी ।
तुरीयगुणगम्भीरा तूर्यनादस्वरूपिणी ॥३०॥
तूर्यविद्यालास्यतुष्टा तूर्यशास्त्रार्थवादिनी ।
तुरीयशास्त्रतत्त्वज्ञा तूर्यवादविनोदिनी ॥३१॥
तूर्यनादान्तनिलया तुर्यानन्दस्वरूपिणी ।
तुरीयभक्तिजननी तुर्यमार्गप्रदर्शिनी ॥३२॥
वकाररूपा वागीशी वरेण्या वरसंविधा ।
वरा वरिष्ठा वैदेही वेदशास्त्रप्रदर्शिनी ॥३३॥
विकल्पशमनी वाणी वाञ्छितार्थफलप्रदा ।
वयःस्था च वयोमध्या वयोऽवस्थाविवर्जिता ॥३४॥
वन्दिनी वादिनी वर्या वाङ्मयी वीरवन्दिता ।
वानप्रस्थाश्रमस्था च वनदुर्गा वनालया ॥३५॥

वनजाक्षी वनचरी वनिता विश्वमोहिनी ।
वसिष्ठवामदेवादिवन्द्या वन्द्यस्वरूपिणी ॥ ३६ ॥
वैद्या वैद्यचिकित्सा च वषट्कारी वसुन्धरा ।
वसुमातावसुत्राता वसुजन्मविमोचनी ॥३७॥
वसुप्रदा वासुदेवी वासुदेवमनोहरी ।
वासवार्चितपादश्रीर्वासवारिविनाशिनी ॥ ३८ ॥
वागीशी वाङ्मनस्था च वशिनी वनवासभूः ।
वामदेवी वरारोहा वाद्यघोषणतत्परा ॥ ३९ ॥
वाचस्पतिसमाराध्या वेदमाता विनोदिनी ।
रेकाररूपा रेवा च रेवातीरनिवासिनी ॥४०॥
राजीवलोचना रामा रागिणी रतिवन्दिता ।
रमणीरामजप्ता च राज्यपा रजताद्रिगा ॥ ४१ ॥
राकिणो रेवती रक्षा रुद्रजन्मा रजस्वला ।
रेणुकारमणी रम्या रतिवृद्धारता रतिः ॥४२॥
रावणानित्यदानन्दा राजश्री राजशेखरी ।
रणमध्या रथारूढा रविकोटिसमप्रभा ॥ ४३ ॥
रविमण्डलमध्यस्था रजनी रविलोचना ।
रथाणगपाणी रक्षोन्घी रागिणी रावणार्चिता ॥४४॥
रम्भादिकन्यकाराध्याराज्यदाराज्यवर्धिनी ।
रजताद्रीशसक्थिस्था रम्या राजीवलोचना ॥ ४५ ॥
रम्यवाणी रमाराध्या राज्यधात्री रतोत्सवा ।
रेवती च रतोत्साहा राजहृद्रोगहारिणी ॥४६॥
रणप्रवृद्धमधुरा रणमण्डपमध्यगा ।
रञ्जिता राजजननी रम्या राकेन्दुमध्यगा ॥४७॥
रविणी रागिणी रञ्या राजराजेश्वरार्चिता ।
रजताचलवासिनी ॥४८॥
राजन्वती राजनीती

राघवार्चितपादश्री राघवी राघवप्रिया ।
रत्नसागरमध्यस्था रत्नद्वीपनिवासिनी ॥४९॥
रत्नप्राकारमध्यस्था रत्नमण्डपमध्यगा ।
रत्नाभिषेकसंतुष्टा रत्नाङ्गी रत्नदायिनी ॥५०॥
णिकाररूपिणी नित्या नित्यतृप्ता निरञ्जना ।
निद्रात्ययविशेषज्ञा नीलजीमूतसंनिभा ॥५१॥
नीवारशूकवत्तन्वी नित्यकल्याणरूपिणी ।
नित्योत्सवा नित्यपूज्या नित्यानन्दस्वरूपिणी ॥५२॥
निर्विकल्पा निर्गुणस्था निश्चिन्ता निरुपद्रवा ।
निस्संशया निरीहा च निर्लोभा नीलमूर्धजा ॥५३॥
निखिलागममध्यस्था निखिलागमसंस्थिता ।
नित्योपाधिविनिर्मुक्ता नित्यकर्मफलप्रदा ॥५४॥
नीलग्रीवा निराहारा निरञ्जनवरप्रदा ।
नवनीतप्रिया नारी नरकार्णवतारिणी ॥५५॥
नारायणी निरीहा च निर्मला निर्गुणप्रिया ।
निश्चिन्ता निगमाचारनिखिलागमवेदिनी ॥५६॥
निमेषा निमिषोत्पन्ना निमेषाण्डविधायिनी ।
निवातदीपमध्यस्था निर्विघ्ना नीचनाशिनी ॥५७॥
नीलवेणी नीलखण्डा निर्विषा निष्कशोभिता ।
नीलांशुकपरीधाना निन्दाघ्नी च निरीश्वरी ॥५८॥
निश्वासोच्छ्वासमध्यस्था नित्ययानविलासिनी ।
यंकाररूपा यन्त्रेशी यन्त्री यन्त्रयशस्विनी ॥५९॥
यन्त्राराधनसंतुष्टा यजमानस्वरूपिणी ।
योगिपूज्या यकारस्था यूपस्तम्भनिवासिनी ॥६०॥
यमघ्नी यमकल्पा च यशःकामा यतीश्वरी ।
यमादियोगनिरतायतिदुःखापहारिणी ॥६१॥

यज्ञा यज्वा यजुर्गेया यज्ञेश्वरपतिव्रता ।
यज्ञसूत्रप्रदा यष्ट्री यज्ञकर्मफलप्रदा ॥६२॥
यवाण्कुरप्रिया यन्त्री यवदघ्नी यवार्चिता ।
यज्ञकर्त्री यज्ञभोक्त्री यज्ञाङ्गी यज्ञवाहिनी ॥६३॥

यज्ञसाक्षी यज्ञमुखी यजुषी यज्ञरक्षणी ।
भकाररूपा भद्रेशी भद्रकल्याणदायिनी ॥६४॥
भक्तप्रिया भक्तसखी भक्ताभीष्टस्वरूपिणी ।
भगिनी भक्तसुलभा भक्तिदा भक्तवत्सला ॥६५॥

भक्तचैतन्यनिलया भक्तबन्धविमोचना ।
भक्तस्वरूपिणी भाग्या भक्तारोग्यप्रदायिनी ॥६६॥
भक्तमाता भक्तगम्या भक्ताभीष्टप्रदायिनी ।
भास्करी भैरवी भोग्या भवानी भयनाशिनी ॥६७॥

भद्रात्मिका भद्रदायी भद्रकाली भयंकरी ।
भगनिष्यन्दिनी भूम्नी भवबन्धविमोचनी ॥६८॥
भीमा भवसखी भङ्गी भण्गुरा भीमदर्शिनी ।
भल्ली भल्लीधरा भीरुर्भेरुण्डा भीमपापहा ॥६९॥

भावज्ञा भोगदात्री च भवघ्नी भूतिभूषणा ।
भूतिदा भूमिदात्री च भूपतित्वप्रदायिनी ॥७०॥
भ्रामरी भ्रमरी भारी भवसागरतारिणी ।
भण्डासुरवधोत्साहा भाग्यदा भावनोदिनी ॥७१॥

गोकाररूपा गोमाता गुरुपत्नी गुरुप्रिया ।
गोरोचनप्रिया गौरी गोविन्दगुणवर्धिनी ॥७२॥
गोपालचेष्टासंतुष्टा गोवर्धनविवर्धिनी ।
गोविन्दरूपिणी गोप्त्री गोकुलानां विवर्धिनी ॥७३॥

गीता गीतप्रिया गेया गोदा गोरूपधारिणी ।
गोपी गोहत्यशमनी गुणिनी गुणविग्रहा ॥७४॥

गोविन्दजननी गोष्ठा गोप्रदा गोकुलोत्सवा ।
गोचरी गौतमी गोप्त्री गोमुखी गुरुवासिनी ॥७५॥
गोपालो गोमयी गुम्फा गोष्ठी गोपुरवासिनी ।
गरुडी गमनश्रेष्ठा गारुडी गरुडध्वजा ॥७६॥
गम्भीरा गण्डकी गङ्गा गरुडध्वजवल्लभा ।
गगनस्था गयावासा गुणवृत्तिर्गुणोद्भवा ॥७७॥
देकाररूपा देवेशी दृग्रूपा देवतार्चिता ।
देवराजेश्वरार्धाङ्गी दीनदैन्यविमोचनी ॥७८॥
देशकालपरिज्ञाना देशोपद्रवनाशिनी ।
देवमाता देवमोहा देवदानवमोहिनी ॥७९॥
देवेन्द्रार्चितपादश्रीर्देवदेवप्रसादिनी ।
देशान्तरीदेशरूपादेवालयनिवासिनी ॥८०॥
देशभ्रमणसंतुष्टा देशस्वास्थ्यप्रदायिनी ।
देवयाना देवता च देवसैन्यप्रपालिनी ॥८१॥
वकाररूपा वाग्देवी वेदमानसगोचरा ।
वैकुण्ठदेशिका वेद्या वायुरूपा वरप्रदा ॥८२॥
वक्रतुण्डार्चितपदा वक्रतुण्डप्रसादिनी ।
वैचित्र्यरूपा वसुधा वसुस्थाना वसुप्रिया ॥८३॥
वषट्कारस्वरूपा च वरारोहा वरासना ।
वैदेहीजननी वेद्या वैदेहीशोकनाशिनी ॥८४॥
वेदमाता वेदकन्या वेदरूपा विनोदिनी ।
वेदान्तवादिनी चैव वेदान्तनिलयप्रिया ॥८५॥
वेदश्रवा वेदघोषा वेदगीताविनोदिनी ।
वेदशास्त्रार्थतत्त्वज्ञा वेदमार्गप्रदर्शिनी ॥८६॥
वेदोक्तकर्मफलदा वेदसागरवाडवा ।
वेदवन्द्या वेदगुह्या वेदाश्वरथवाहिनी ॥८७॥

वेदचक्रा वेदवन्द्या वेदाङ्गो वेदवित्कविः ।
सकाररूपा सामान्ता सामगानविचक्षणा ॥८८॥
साम्राज्ञी सामरूपा च सदानन्दप्रदायिनी ।
सर्वदृक्संनिविष्टा च सर्वसम्प्रेषिणी सहा ॥८९॥

सव्यापसव्यदा सव्यसध्रीची च सहायिनी ।
सकला सागरा सारा सार्वभौमस्वरूपिणी ॥९०॥
संतोषजननी सेव्या सर्वेशी सर्वरञ्जनी ।
सरस्वती समाराध्या सामदा सिंधुसेविता ॥९१॥

सम्मोहिनी सदामोहा सर्वमाङ्गल्यदायिनी ।
समस्तभुवनेशानी सर्वकामफलप्रदा ॥९२॥
सर्वसिद्धिप्रदा साध्वी सर्वज्ञानप्रदायिनी ।
सर्वदारिद्र्यशमनी सर्वदुःखविमोचनी ॥९३॥

सर्वरोगप्रशमनी सर्वपापविमोचनी ।
समदृष्टिः समगुणा सर्वगोप्त्री सहायिनी ॥९४॥
सामर्थ्यवाहिनीसांख्या सान्द्रानन्दपयोधरा ।
संकीर्णमन्दिरस्थाना साकेतकुलपालिनी ॥९५॥

संहारिणी सुधारूपा साकेतपुरवासिनी ।
सम्बोधिनी समस्तेशी सत्यज्ञानस्वरूपिणी ॥९६॥
सम्पत्करी समानाङ्गी सर्वभावसुसंस्थिता ।
संध्यावन्दनसुप्रीता सन्मार्गकुलपालिनी ॥९७॥

संजीविनी सर्वमेधा सभ्या साधुसुपूजिता ।
समिद्धा सामिधेनी च सामान्या सामवेदिनी ॥९८॥
समुत्तीर्णा सदाचारा संहारा सर्वपावनी ।
सर्पिणी सर्पमाता च सामदानसुखप्रदा ॥९९॥

सर्वरोगप्रशमनी सर्वज्ञत्वफलप्रदा ।
संक्रमा समदा सिन्धुः सर्गादिकरणक्षमा ॥१००॥

संकटा संकटहरा सकुण्कुमविलेपना ।
सुमुखी सुमुखप्रीता समानाधिकवर्जिता ॥१०१॥
संस्तुता स्तुतिसुप्रीता सत्यवादी सदास्पदा ।
धीकाररूपा धीमाता धीरा धीरप्रसादिनी ॥१०२॥
धीरोत्तमा धीरधीरा धीरस्था धीरशेखरा ।
धृतिरूपा धनाढ्या च धनपा धनदायिनी ॥१०३॥
धीरूपा धीरवन्द्या च धीप्रभा धीरमानसा ।
धीगेया धीपदस्था च धीशानी धीप्रसादिनी ॥१०४॥
मकाररूपा मैत्रेयी महामङ्गलदेवता ।
मनोवैकल्यशमनी मलयाचलवासिनी ॥१०५॥
मलयध्वजराजश्रीर्मायामोहविभेदिनी ।
महादेवी महारूपा महाभैरवपूजिता ॥१०६॥
मनुप्रीता मन्त्रमूर्तिर्मन्त्रवश्या महेश्वरी ।
मत्तमातङ्गगमना सधुरा मेरुमण्डपा ॥१०७॥
महागुप्ता महाभूतमहाभयविनाशिनी ।
महाशौर्या मन्त्रिणी च महावैरिविनाशिनी ॥१०८॥
महालक्ष्मीर्महागौरी महिषासुरमर्दिनी ।
मही च मण्डलस्था च मधुरागमपूजिता ॥१०९॥
मेधा मेधाकरी मेध्या माधवी मधुमर्दिनी ।
मन्त्रा मन्त्रमयीमान्या माया माधवमन्त्रिणी ॥११०॥
मायादूरा च मायावी मायाज्ञा मानदायिनी ।
मायासंकल्पजननी मायामयविनोदिनी ॥१११॥
मायाप्रपञ्चशमनी मायासंहाररूपिणी ।
मायामन्त्रप्रसादा च मायाजनविमोहिनी ॥११२॥
महापथा महाभोगा महाविघ्नविनाशिनी ।
महानुभावा मन्त्राढ्या महामण्गलदेवता ॥११३॥

हिकाररूपा हृद्या च हितकार्यप्रवर्धिनी ।
हेयोपाधिविनिर्मुक्ता हीनलोकविनाशिनी ॥११४॥
ह्रींकारी ह्रीमती हृद्या ह्रींदेवी ह्रींस्वभाविनी ।
ह्रींमन्दिरा हितकरी हृष्टा च ह्रींकुलोद्भवा ॥११५॥

हितप्रज्ञा हितप्रीता हितकारुण्यवर्धिनी ।
हिताशिनी हितक्रोधा हितकर्मफलप्रदा ॥११६॥
हिमा हैमवती हैम्नी हेमाचलनिवासिनी ।
हिमागजा हितकरी हितकर्मस्वभाविनी ॥११७॥

धीकाररूपा धिषणा धर्मरूपा धनेश्वरी ।
धनुर्धरा धराधारा धर्मकर्मफलप्रदा ॥११८॥
धर्माचारा धर्मसारा धर्ममध्यनिवासिनी ।
धनुर्विद्या धनुर्वेदा धन्या धूर्तविनाशिनी ॥११९॥

धनधान्या धेनुरूपा धनाढ्या धनदायिनी ।
धनेशी धर्मनिरता धर्मराजप्रसादिनी ॥१२०॥
धर्मस्वरूपा धर्मेशी धर्माधर्मविचारिणी ।
धर्मसूक्ष्मा धर्मगेहा धर्मिष्ठा धर्मगोचरा ॥१२१॥

योकाररूपा योगेशी योगस्था योगरूपिणी ।
योग्या योगीशवरदा योगमार्गनिवासिनी ॥१२२॥
योगासनस्था योगेशी योगमायाविलासिनी ।
योगिनी योगरक्ता च योगाङ्गी योगविग्रहा ॥१२३॥

योगवासा योगभोग्या योगमार्गप्रदर्शिनी ।
योकाररूपा योधाढ्या योद्ध्री योधसुतत्परा ॥१२४॥
योगिनी योगिनीसेव्या योगज्ञानप्रबोधिनी ।
योगेश्वरप्राणनाथा योगीश्वरहृदिस्थिता ॥

योगा योगक्षेमकर्त्री योगक्षेमविधायिनी ।
योगराजेश्वराराध्या योगानन्दस्वरूपिणी ॥१२५॥

नकाररूपा नादेशी नामपारायणप्रिया ।
नवसिद्धिसमाराध्या नारायणमनोहरी ॥१२७॥
नारायणी नवाधारा नवब्रह्मार्चिताङ्घ्रिका ।
नगेन्द्रतनयाराध्या नामरूपविवर्जिता ॥१२८॥
नरसिंहार्चितपदा नवबन्धविमोचनी ।
नवग्रहार्चितपदा नवमीपूजनप्रिया ॥१२९॥
नैमित्तिकार्थफलदा नन्दितारिविनाशिनी ।
नवपीठस्थिता नादा नवर्षिगणसेविता ॥१३०॥
नवसूत्रविधानज्ञा नैमिषारण्यवासिनी ।
नवचन्दनदिग्धाङ्गीनवकुण्कुमधारिणी ॥१३१॥
नववस्त्रपरीधाना नवरत्नविभूषणा ।
नव्यभस्मविदिग्धाङ्गी नवचन्द्रकलाधरा ॥१३२॥
प्रकाररूपा प्राणेशी प्राणसंरक्षणी परा ।
प्राणसंजीविनी प्राच्या प्राणिप्राणप्रबोधिनी ॥१३३॥
प्रज्ञा प्राज्ञा प्रभापुष्पा प्रतीची प्रबुधप्रिया ।
प्राचीना प्राणिचित्तस्था प्रभा प्रज्ञानरूपिणी ॥१३४॥
प्रभातकर्मसंतुष्टा प्राणायामपरायणा ।
प्रायज्ञा प्रणवा प्राणा प्रवृत्तिःप्रकृतिः परा ॥१३५॥
प्रबन्धा प्रथमा चैव प्रगा प्रारब्धनाशिनी ।
प्रबोधनिरता प्रेक्ष्या प्रबन्धा प्राणसाक्षिणी ॥१३६॥
प्रयागतीर्थनिलया प्रत्यक्षपरमेश्वरी ।
प्रणवाद्यन्तनिलया प्रणवादिः प्रजेश्वरी ॥१३७॥
चोकाररूपा चोरघ्नी चोरबाधाविनाशिनी ।
चैतन्यचेतनस्था च चतुरा च चमत्कृतिः ॥१३८॥
चक्रवर्तिकुलाधारा चक्रिणी चक्रधारिणी ।
चित्तगेया चिदानन्दा चिद्रूपा चिद्विलासिनी ॥१३९॥

चिन्ता चित्तप्रशमनी चिन्तितार्थफलप्रदा ।
चाम्पेयी चम्पकप्रीता चण्डी चण्डाट्टहासिनी ॥१४०॥
चण्डेश्वरी चण्डमाता चण्डमुण्डविनाशिनी ।
चकोराक्षी चिरप्रीता चिकुरा चिकुरालका ॥१४१॥
चैतन्यरूपिणी चैत्री चेतना चित्तसाक्षिणी ।
चित्रा चित्रविचित्राङ्गी चित्रगुप्तप्रसादिनी ॥१४२॥
चलना चक्रसंस्था च चाम्पेयी चलचित्रिणी ।
चन्द्रमण्डलमध्यस्था चन्द्रकोटिसुशीतला ॥१४३॥
चन्द्रानुजसमाराध्या चन्द्रा चण्डमहोदरी ।
चर्चितारिश्चन्द्रमाता चन्द्रकान्ता चलेश्वरी ॥१४४॥
चराचरनिवासी च चक्रपाणिसहोदरी ।
दकाररूपा दत्तश्रीर्दारिद्र्यच्छेदकारिणी ॥१४५॥
दत्तात्रेयस्य वरदा दयालुर्दीनवत्सला ।
दक्षाराध्या दक्षकन्या दक्षयज्ञविनाशिनी ॥१४६॥
दक्षा दाक्षायणी दीक्षा दृष्टा दक्षवरप्रदा ।
दक्षिणा दक्षिणाराध्या दक्षिणामूर्तिरूपिणी ॥१४७॥
दयावती दमस्वान्ता दनुजारिर्दयानिधिः ।
दन्तशोभानिभा देवी दमनी दाडिमस्तनी ॥१४८॥
दण्डा च दमयित्री च दण्डिनी दमनप्रिया ।
दण्डकारण्यनिलया दण्डकारिविनाशिनी ॥१४९॥
दंष्ट्राकरालवदना दण्डशोभा दरोदरी ।
दरिद्रारिष्टशमनी दम्या दमनपूजिता ॥१५०॥
दानवार्चितपादश्रीर्द्रविणा द्राविणी दया ।
दामोदरी दानवारिर्दामोदरसहोदरी ॥१५१॥
दात्री दानप्रिया दाम्नी दानश्रीर्द्विजवन्दिता ।
दन्तिगा दण्डिनी दूर्वा दधिदुग्धस्वरूपिणी ॥१५२॥

दाडिमीबीजसंदोहदन्तपङ्क्तिविराजिता ।
दर्पणा दर्पणस्वच्छा द्रुममण्डलवासिनी ॥१५३॥
दशावतारजननी दशदिग्दैवपूजिता ।
दमा दशदिशा दृश्या दशदासी दयानिधिः ॥१५४॥
देशकालपरिज्ञाना देशकालविशोधिनी ।
दशम्यादिकलाराध्या दशग्रीवविरोधिनी ॥१५५॥
दशापराधशमनी दशवृत्तिफलप्रदा ।
यात्काररूपिणी याज्ञी यादवी यादवार्चित ॥१५६॥
ययातिपूजनप्रीता याज्ञिकी याज्ञकप्रिया ।
यजमाना यदुप्रीता यामपूजाफलप्रदा ॥१५७॥
यशस्विनी यमाराध्या यमकन्या यतीश्वरी ।
यमादियोगसंतुष्टा योगीन्द्रहृदया यमा ॥१५८॥
यमोपाधिविनिर्मुक्ता यशस्यविधिसंनुता ।
यवीयसी युवप्रीता यात्रानन्दा यतीश्वरी ॥१५९॥
योगप्रिया योगगम्या योगध्येया यथेच्छगा ।
यागप्रिया याज्ञसेनी योगरूपा यथेष्टदा ॥१६०॥

(श्रीगायत्रीदिव्यसहस्रनामस्तोत्रं सम्पूर्णम्)

★ ★ ★